१०५
२(A)

105
2(A)

"अथ"

ग्रन्थनामः-	"अद्वैतप्रमाणमाला"	
कर्तृनामः-	आनन्दाचार्यः"	
विषयः-	अद्वैतवेदान्तम् (प्रकरणम्)	

Adwaita pramana mala

935

१६

इति

प्रमाणमाला समाप्ता

१०५
२(B)

आनन्दाचार्यप्रणीता

105
2(A)

प्रमा० ॥६०॥ श्रीगणेशाय नमः॥ ॥ श्रीमन्मंगलमूर्तये रामाय नमः॥ ॥ आनंदमात्मानमशेषसंवेदं प्रणम्य विज्ञानतनुं गुरुं च प्रमासाधने
१ नस्य सद्बोधमुखीं प्रमाणमालां रचयामि रम्यां॥ १॥ आनंदोऽदुःखाभावो न भवति तदनिरूप्यत्वाद् घटवन्नत्र्यायथा घट॥ य
द् आनंदो नाभावरूपः प्रतियोग्यनिरूप्यत्वाद् घटवत्॥ अवाच्यस्य परस्य दानंदपदस्य दुःखाभावे प्रयुक्ते प्रतियोग्यनिरूप्यत्वम
सिद्धमिति तद्विशेषणं॥ अकस्मादुपन्नविपर्ययाध्यवसायश्रवणाद् दुःखाभावस्य [illegible] तेनापि दुःखाभावाकर्षणानंदस्वेदमात्मा तानंदो भावएव
दुःखमिति सर्वन्यायेन विपरीतप्रसंगात्॥ न च दुःखाभावविरोधित्वेनेत्यत्रापि [illegible] संसर्गाभावमध्यत्रापि निवेशात्॥ प्रतियो
ग्यनिरूप्यस्याप्यलाव [illegible] प्रसंगात्॥ किं चानंदो भावरूपः सातिशयत्वात् दुःखवत्॥ न च निवर्त्यदुःखापाधेरतिश
२ यनिरुक्तेः॥ अन्यथा पिरूणनाशा लोके स्वापावस्थादिन तया प्रीयते लोको यथांतरेण प्रयासं प्राप्ते [illegible] उपाधिनिरसने
न समर्थनीयेति॥ एवं स्थिते विज्ञानमानंदं ब्रह्मेति श्रुतावानंदशब्दस्य स एवार्थो लोकानुसाराद्वाधकाद्यथात्वमिति वि
ज्ञानंदनिरूपणं॥ २॥ ब्रह्मात्मस्वरूपमोक्षे तदानंदरागान्मवर्तमानस्य संसारप्रसंगोवाधकः स्यात्॥ रागनिबंधनाप्रवृत्तिः संस
रबीजमिति हि शास्त्रस्थितिरिति चेन्नैवं॥ अस्य परमानंदरागोपरलेन तत्प्रवृत्तिविरोधित्वात्॥ परमोहि ब्रह्मानंदः स एषोऽस्य पर
मानंदः एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः॥ तथा च न तत्रोपरागः कथमन्यथा यत्र नेकदुःखसं [illegible] १
सारिके शुद्धे प्रवर्तयेत्॥ न च लाले कदाचिदन्यथापि प्रवृत्तिर्न विरलालसमनका मिथ्यादृष्टार्थदुःखमिति तन्न्यायात्॥ [illegible]
त्॥ न च सेवं कथ्य विमर्शस्य महारं तस्मात् प्रथमनसोवशी कृतेन्द्रियग्रामस्य॥ प्रकृत एवार्थप्रवृत्तिसंभवात्॥ तादृश एवा[illegible]

कारीमोक्षशास्त्रे विनश्चितः। नचसर्वाधिकारं किमपि शास्त्रं संभवति। यच्चैवमपि दर्शनं कथं ॥ संबोधयन्ति हि मो यथा ...
प्राह। रागानिबंधनत्वात् द्वेषप्रवृत्तिः संसारबीजं तत्र प्रवृत्तिर्यदि ति। तस्य दुःखोद्वेगमा त्रेपि मा द्वेष नहेतुः निबंधना प्रवृत्तिर्द्वेष नि बंधने त्ये
वकथं नसंसारबीजमवेता तथा कृतेन स्पष्टत्रिवत्रा न तत्र द्वेषात्प्रवृत्तिः किंतु संसार। सारत्वावलक्षणेन निष्पन्नाद्दुःखोद्वेगा ... मिथ्याज्ञाना ननि
रानो हि द्वेषप्रवृत्तिर्येता अत्रापि तर्हि निरागात्पत्वनिरपि तु परमार्थदर्शन निदानायाः परमानंदस्याप्रद्धाया एव नही ... मात्र रागः किंतर्हि
मिथ्याज्ञानोपादानेनैवसा। अत एव लग वाच्यं तंजलिरविद्या क्षेत्रत्वमाहस्म परेषां क्लेशानां। अविद्या क्षेत्र मुत्तरेषां प्रसुप्ततनुविच्छिन्नोदा
राणामिति। तस्मान्मुख्यार्थबाधकाभावाद्दुःख लक्षणानंदश्रुतिर्न दुःखाभावपरतयोपचरणीयेति सिद्धं। अस्तु नित्यं तत्रानंत्रपरमात्मोप
ते। तथा वायमानंदस्वभावः स्यान्नात्मवादपरात्मवशात्तत्वमसीत्यस्य कुदेकात्म्यश्रुतेस्तथा। न चत्वानंदात्मनो जीवादन्यत्वात्ः पर
मात्मानं हि परिमोमत्वक्विश्रुत्सहतेविरोधात्। जीवस्य परमानंदस्वभावः परप्रेमास्पदत्वात्। तथा च कस्याप्याभावमिनासाकुःक्षा
मतेष्वथा घट। नचायं मुक्तसाधनोनानवृत्तित्वात्। अतोक्तासाध्यंशतिः नचायमसिद्धो हेतुः। परोहितिरतिशय स्वात्मनि सर्वस्य प्रेमा
दृश्यते। कथमपरथा नार्थ्यं नेवापरः सर्वोपिजेमगोचरः स्यात्। भोक्तृत्वानंदमपिहो। किं कं तृप्तोरोचयंते किं चात्मार्थमन्यथा हृप
सैदेनस्थपरानंदस्योरविशेषापत्तेः। यदा स्वानंदस्यापीदृशी दशा तदा किमन्यत्ववक्तव्यमिति। भवति चात्रश्रुतिः आत्मनस्तु कामाय
सर्वप्रियंभवतीति। यद्यप्यर्थं प्रियं भवति तेनाप्यात्मशिष्येन प्रियः इति लोके दृष्टं यथा पुत्रार्थितया प्रिया तान्मित्रादेः सुरद्वाति। तचतत्वेपर ५
प्रेमास्पदस्यात्मा तथा पि परमानंदस्वभावो मा सूत्क्लिना भक्तमिति चिराग्नुयते। ततावत्ससाधनेनसुःखःपोपेक्षणीयस्य वाप्रेमगोचर

नसुखकाद्विषाद्यपेक्षणाद्वा दुःखाभावस्तु यद्यपि सुखमात्रं तथा। पि न तद्रूपत्वेनात्मनि भासं स्वेच्छस्य न स्वरूपत्वं। यद्यपि सुखमात्रमात्मनो
प्रेमास्ति तथापि सुखमात्रो वराकः तत्र सातिशयत्वं स्वात्मनि तु सुखगोचरादृप्रश्निको निरतिशय एव। यमास्मृतो सुखगोचराच्च प्रमाणाय
सातिशयानां सुखातिशयानुशायी हरूपत्वेन सर्वलोकोपक्रमे स्तूत्तरोत्तरश तत्सुणाज्ञानंदत्वमिति सकललौकिकसुखप्रेमातिशायी।
निरतिशयोयमात्मनि प्रेमा सर्वानंदातिशायित्वेनानतिशयानंदरूप एवावतिष्ठमानेन निमित्तवकल्पतद्बलानि छतात्प्रवृत्तिता सुप
तव्यातिरेकमपरात्मनि परमानंदस्वल। वेमिद्वैनदनित्रः परमात्मापि तद्रूप एवत्व विंवेकरूपस्य प्राप्ये तो। स्वमानंदमात्मनामिति। क
थं तु न जीवपरमात्मनोरभेदसंसार्यसंसारी। द्विताविनानयोर्भेदः संगच्छते। कथं वा जीवानामपि [illegible] वपरस्परं पंडितमूर्खा। द्विताविनैक्यन
रतुक्रमसस्यभेदमिति। नायं तदा स्पशुतिवाधितत्वात्स्मयोर्भेदः किंत द्विविंबप्रतिविंबयोः प्रतिविंबानामिव वपरस्परमलीकभिन्नी
सएवोपपद्यतइत्यर्थः। किंच। जीवः परमात्मनोनन्यथंता। स्वबाइ परमात्मवत्। परस्परं भेदनिरासायोक्तो। विवादास्पदीभूता
नि भोगायतनानि एकस्यवाघ विवादास्पदस्यैवात्मनो भोगायतनानि भोगायतनत्वात्संमतिवादिभोगायतनवदित्यर्थः। विवादपदानीन्द्रियाणि
एकस्यसिद्धस्यैव भोगसाधनानि भोगसाधनत्वात्संमतिवादीन्द्रियवत्। एवं प्रत्येकं च तुरा। किमपि पक्षीकृत्य प्रयोक्तव्यं। वि
पर्यये लिको नैवोपपन्नावाकाशादिविकल्पना गौरवं बाधकस्तत्र यो अनतुसंधानं तु जीवान्तरजीवस्य शिरावच्छिन्नस्वात्मलाग
परावच्छिन्नस्योपाधिकभेदप्रयुक्तस्यैवोपपद्यते। परमेश्वरस्य तु सर्वज्ञत्वेन कुरडुस्र क्षानेपिन प्रवृत्तिसंकरप्रसंगः शरीराणामिति प्रयं २
वितमथना। किंच। विवादाध्यासिता जीवाः प्रतिवादिनः स्मृतत्वात्सर्वेषां जीवत्वाद्दात्मत्वाद्वा प्रतिवादिवत्। नवामुष्मात्सिद्धमि

तात्त्विकत्वमसा। नादृश्यत्वमनोहां भेदस्यात्यादिप्रत्यक्षविरोधः। परात्मनः प्रसक्तत्वानभ्युपगमात्प्रत्यक्षत्वात्प्रत्यक्षयुगपद्धर्मस्पद
नेदृश्यत्वमप्रसक्तत्वात् उपपत्तेर्वा उक्तत्वस्य तिसंयोगवत्। उपपत्तेर्वा शाश्वतिकबाधाभावलक्षणस्य तात्त्विकत्वस्य प्रसक्तौ कर्तुं तथ
कृतयापेक्षता। प्रतिपन्नत्वाच्चानवकाला। तत्र खण्डीवाधः संप्रतियोगोपायेन तत्स्वरूपत्वात्तत्त्वबोधानिश्चयित। न वक्तृत्वरूपमेवत्वावान्
लेदेशमिति विवक्षितयुगपद्धर्मत्वासिद्धिः। अथ समति प्रतियोग्यनपेक्षत्वप्रसंगात्। न द्विघटादिष्विदं प्रतियोग्यपेक्षं प्रतिलासते। घटादि
प्रतिलासेपि घटत्वादिप्रतीतिदर्शनात्। तानेदस्फुनियमेन प्रतियोग्यपेक्षः। प्रतिलाति घटात्मयो भिन्न इति। तस्मात्स्वपेक्षापेक्षत्वलक्षण
विरुद्धधर्माध्यासमात्रानयोरैक्यं संभवति। किं वास्मिन्मते स्वरूपाणामानत्यात्कथं नैकं भिन्नपदप्रवृत्तिः। इतरेतराभावापाभि
नेति वेद्या। स एव तर्हि सामामासविवेकेन भेदः स्यात्। तथा सति घटो भिन्नो घटस्पदेशे इति विशेषणविशेष्यसंबंधाबलासावं
जस्येनोपपादितेष्यातां। न वा त्वलौकिकानामुपचारा॰ भिमानस्यितमिदं विस्मयंजसं॥ ॥ अथ यदा सर्वदिशांकिंकारकाणामस्तु
काम सत्यमेदमिति। सर्वोपिहितोदः शून्या बाध्यते। एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किंचनेति। न च ब्रह्माधिकारणस्पशा
नाभूतस्यानिषेधयितुमतोऽन्यत्र तत्त्वदेदिति शंकनीयं। कारणादत्यत्र कार्याभ्युपपत्तेः ब्रह्मणश्चाकाशादिकारणताया अशेषोप
निषत्प्रसिद्धत्वाद्देवदेवोस्तु इति॰ नाम कारणात्कार्यं न च क्वेत्रत्र कृतत्वदेवेदिति। प्रतिष्ठितप्रामाण्यप्रायो न्यायस्यादि विरोधा
न्नवृत्तेः पराबीतमागमवाक्यं कथं तत्र बरैरिदमप बाधते इति विशमेवा। तत्परत्वात्परत्वाच्च निर्दोषत्वाच्च वैदिकं। स्वसंस्पवाध
कंतार्थसर्वस्मात्सवाक्यवत्र। तत्परत्वं चोपक्रमादिभिः षड्विधतात्पर्यलिंगावगम्यं। अवगमितं च ॰ स्मादि रीतिनेहविपर्ययतो सं

प्रमा ग्रहाभिकारात्। अत्राद्वैतसाधनश्लोकः। विमतं तात्त्विकभेदान्तर्दहीनं मितत्वात्। यदित्थं तत्तथा यथा इत्थं चेदं तत्तथा॥ विम
३ तं विप्रतिपन्नं मितत्वेनोक्तानत्वात् यथा दृश्यं यथाकाशमित्यर्थः। अत्र च समुदायस्य संदिग्धसाध्यतया पक्षत्वपि तदेकदेशस्य
प्याकाशस्य लिंगपतरेण निश्चितसाध्यतया साध्यग्रहणस्थानत्वात् दृष्टांततायां न कापि दृष्टानुपपत्तिरिति गमयितव्यं। न
न्वत्र तात्त्विकत्वे न तावदर्थं वक्तुं नः स्वरूपावस्तुदितं अत [illegible] त्स्वरूपावेदनतावदयं यत्र प्रतिभाति। इदमस्मात् भिन्नमित्य
यमनयोर्भेद इति वा वक्तुं विशेषणत्वेन वा विशेष्यत्वेन वा प्रतिभासनियमात्। विशेषणविशेष्यत्वेन तु प्रतिभासो भेदोत्रस्य
ग्रहणपूर्वक एव स्यात्। द्व्यादेस्तद्भावप्रतिभासस्य तदस्य ग्रहणपूर्वकत्वनियमात्। तस्य चासंबंधगर्भत्वात् संबंधस्य च भिन्न
प्रधानत्वेनैव प्रतीतिसंभवात्। अनाकलितभेदसंबंधयोश्च ह्रस्वयोर्दंतस्पर्शः कदाचिदपि विशेषणविशेष्यभावेना
निश्चयात्तस्य अनेकत्वेन प्रतिभासासंदेहात्। विशेषणविशेष्यभावस्य गुणप्रधानभावगर्भत्वेनानुभवाच्च तस्य च नियमेन
भिन्नाभिधानन्नये च प्रतिभासः। इत्युक्तं तर्हि भेदग्रहणस्य भेदांतरग्रहणपूर्वकत्वनियमस्तथापि किंप्रायात मिति वेद्दिदम
पार्शं तस्याधिलेस्यभेदांतरग्रहणपूर्वकत्वं तस्यापि तस्यापीत्यनवस्था मूलक्षयकारीति अपूर्वभावश्च भावसमुच्चयः सुनरच
नावलागप्रयुक्तानवस्थितिरेवासुक्ता। परस्परप्रतिषेधात्मकयोर्विधिनिषेधयोरेकत्वविरोधाच्च। आविरोधे वा जगति विरो
धोच्छेदप्रसंगात्। भावाभावयोः साक्षाद्विरोधश्च रत्नुषीकास्यात्रे निश्चितिः। असमुच्चयात्मनो विप्रकारस्यानयोः प्रतिस्पर्द्धिनी ३
रभंसवच्चैवं समज्ञानवादे तिरिक्तं च युग अथ भाव एव स्यात्तथा तन्मात्र तत्त्व एव स्याद् अनतिरिके च भाव एवेति कथमयं तृतीयः

निबेध

नित्यत्व... स्याद्वादस्वभावावच्छिन्नत्वविलक्षणात्मायमस्तित्विति चेन्नैवं। परस्परविरुद्धानां नित्यत्वादिविशेषाणां समुच्चयविरोधस्य गीर्वाणैरप्य
...समुच्चय वारणात्। एतेनवक्तृःकोटिविनिर्मुक्तोस्येति पराास्तं। वक्तृःकोद्यात्मनोपिप्रसक्तेर्विरोधस्योभयत्राविशेषात्। नवस्तुहि वक्तृकोद्यात्मा
स्त्रितिवाच्यं। एकैककोटिनियमस्यतात्विकत्वातात्विकत्वयोरप्यनुपपत्तेः। यदि चवक्तृकैककोटीनां भेदात्मकत्वनियमस्तात्विकः क
थमेकस्यवक्तृःकोद्यात्मासर्वेशात्वनियमोपिनस्यतस्य कोस्यइतिकथंवक्तृःकोद्यात्मैकः स्याद्वादस्यहिलक्षणानामुपगमोप्येवमेव
जडस्यानुपपन्नइतिचेत् सत्यं तात्विकत्वेतथैवा स्वएवतत्वनेतावत्तत्वा। निश्चित्यवक्तृप्रशक्यत्वादनिर्वचनीयमेवतदुच्यतेतासदसद्वैल
क्षण्यादिवाद्युक्तिरपि तन्नद्रूपनिरूपणासहिष्णुत्वमात्रप्रकटनायनतुतद्विरुद्धसमुच्चयात्मनोरूपांतरस्यतात्विकत्वप्रकटनायेति
नकिंचनास्माकंदुष्यति। तस्मादस्यानात्मैवानुच्छत्वेदोषापिवक्तृत्वाबादिविकल्पानुपपत्तेश्चानिर्वाच्य एवासुपपत्तव्यानात्विक
इति सिद्धं॥ किंच अस्मादिदंभिन्नमित्यवध्यवधिमद्रूपायच्छिन्नोल्लेखः प्रतीतिरात्मनो विशेषणप्रतीतिरासपूर्वकत्वविशिष्टप्रतीतिसाम
ग्र्योः कार्यकारणभावनियमाद्वा नवस्तुस्फुरमात्रमविलासोगद्वस्यमानभवद्धित्वेनावधिमत्त्वेनवाव्यवसातुंशक्यंतत्वत्तयधिष्ठव
वसीयमानंतथैवपर्यवस्येत्स्वाधिमत्त्वेनावितथैवात्तत्वंइमेकप्रमामातावाविनाकृतत्वेनात्योन्य विरुद्धावध्यवधिमद्रूपद
यावच्छिन्नमधिगंतुंशक्यो। तथाचाद्वावाधारत्वेदृप्रतिपन्नेभिन्नाधारमसंकीर्णमेवावभिन्नमवधिमत्वंवाधिगंतव्यंअवध्यवधिम
द्रूपावच्छिन्नस्यतेरोक्तरूपनरस्येक्तो। तथाचानुध्यवधिमद्रूपावत्प्रतीतावस्येदृप्रतिभास्यत्स्यति तासैवावध्यवधिमद्भावप्रतीतावस्य
इतीतरेतराश्रयप्रसंगः। एतेनेदमपास्तं। यदाज्ञरेको नीलंनीलतयापीतंपीततया विदित्वा अस्मादिदंभिन्नमितिप्रत्येष्यतइति।

प्रमा॰ नहिनीलंनीलतयैवपीतंपीततयैवतत्स्वभावभिन्नत्वंकिंतर्हिअवधिभेदेनावधिमत्त्वेनचावधिभेदमवधिमत्त्वंवाविनागप्रत्येकशः
४ कामित्युक्तं। तथा च कथं प्रायुक्तः परस्पराश्रयप्रसंगो तत्र चेत्। किंचनीलंनीलतयापीतंपीततये[...]तिनिर्विकल्पकंवानी-
लादिरूपमुपलक्ष्यते किंवानीलताद्यवच्छिन्नंशब्दानुविद्धंसविकल्पके। पूर्वस्मिन्कल्पेनशब्दानुव्याप्तवतिसंसर्गभिन्नत्वंतयोरव-
बोधावच्छेदकतावेनप्रतिज्ञातोभवेत्। नहिनिर्विकल्पकाःपदार्थाःप्रतिनियतविवक्षार्थस्यसविकल्पकइतिद्वितीयंवरं। तत्रास्मि-
न्नीलत्वादियोगात्स्वधातृत्वेनपरस्परमपिव्यावृत्तयोःशब्दतयोःप्रतिज्ञातसंभवात्। तत्प्रतिज्ञासमस्थावधावच्छिन्नरूपत्वप्रतिप-
त्तिपूर्वकइतिकथंसमन्वयहेतुतातथापरस्पराश्रयोनप्राप्नुयादिति। अनयैवदिशापरोपन्यासानुकूलस्तर्कस्तन्नेयः। यद्वा। विवादाध्यासिते
तेदोषेमिथ्यात्वेतदलाभवादर्पणादिगतमुखादिभेदवदिति। विपर्ययेबाधकमुक्तं। यद्वाविवादपदंभेदसंवेदनंमिथ्यात्वेतत्संवेदनत्वात्स्व-
प्नभेदसंवेदनवदिति। सत्यत्वेतुभेदसंवेदनस्यलक्षणरूपस्यादिदिशाओपम्यायानुगृहीतान्वयव्यतिरेकपरिकल्पितनद्भूगनिष्ठकारणे
षनिरूपणानुपपत्तेरात्मकसामिकस्यप्रसक्तिर्बाधिका। अथैवंभेदस्यपर्वस्याप्यलीकत्वेनिर्विकल्पत्वेतदपवादेऽस्यस्वयमेवावशिष्यतेकिंवासत्यंज्ञानं
ब्रह्मेतिकिमत्रविनिगमककारणं। उच्यते। विवादाध्यासिताघटादिभेदाःसद्रूपपरिकल्पिताःप्रत्येकंतदनुविद्धत्वात्। येयेनप्रत्येकंतद-
नुविद्धास्तेतत्रपरिकल्पिताः। यथाप्रत्येकंचन्द्ररूपानुविद्धास्तत्रपरिकल्पिताजलतरंगचन्द्रभेदास्तथाचामीघटादिभेदाःसद्रूपानुवि-
द्धास्तस्मात्तत्रपरिकल्पिताः। तदनुविद्धत्वंचतस्यतुरागेणैवविधीयमानत्वं। नचैवंव्याप्यतायत्रसभ्रान्तिर्दिशाघटः। दूरान्तरवानिरन्तर ४
वनाकारानुविद्धाःप्रतिज्ञासंतेनैवातत्रपरिकल्पिताइतितत्रव्यवच्छेदार्थंप्रत्येकमित्युक्तं। नहिप्रत्येकंतत्रतत्रवनमस्तीतिमतिःकिंतुमिलिते

ष्ठिति। विपर्ययेत्तु निरधिष्ठानो भ्रमो निरवधिकश्च बाधः स्यात्। तथा च तयोरधिष्ठानावधी सत्त्वमधिकप्रमाणान्तरेण प्रसिद्धं निमि-
त्तासंसर्गाख्यानिमित्तत्वप्रसक्तिर्वाधिका। न च शून्यमेवाधिष्ठानमवधिश्च स्यात् शायदनुविद्धं ग्राह्ये प्रतिभाति रजतं ते न तदधिष्ठानं स
एवावधिश्च यथा शुक्तिरिदमंशो रूप्यमस्य न कदाचिद्विशून्यतया तु विभ्रमाग्रे प्रतिभाति तानीति कथं न तत्र यथा ख्यातं महीदमिव पिष्टस्यं क
विर्भवति किं तर्हि शुक्त्यादिकं। अन्यथा ऽसत्ख्यातेरुपादानानुपपत्तेरिति। विवादाध्यासितानां वा ऽध्यस्तानुगतप्रतिभासे स्वरूपानिप-
कल्पिताः। विभ्रमत्वादिदिति न तथा यथा सर्पधारादण्डमालाबलीवर्द्दस्फुरितं वादी निष्ठानुगतप्रतिभासेरूपांशे परिकल्पि-
तानीति। विपर्ययेत्तु बाधकमुक्तं। अत्र हि कश्चित्... स्यादेतदेवं यदि सर्पादयः परिकल्पिताः स्युः न त्वेवं तस्य सप्तानामपि यथार्थत्वात्
तथा हि। विवादाध्यासिताः प्रत्ययाः यथार्थाः प्रत्ययत्वात् उभयसिद्धप्रत्ययवत्। न च सर्वेष्वप्ययथार्थ्य एव प्रत्ययत्वमिति दृष्टान्तासि-
द्धिरप्येवं प्रत्ययस्य यथार्थत्वाविपर्ययत्वयोर्व्याघातात्। यदि ह्ययं यथार्थः स्यात् कथं तदा सर्वोऽप्ययथार्थः। यदि त्वयमयथार्थस्तथा-
प्यस्य विषयवैपरीत्याय केन वियथार्थेन प्रत्ययेन भवितव्यमिति कथं न व्याघात इति। न हि स्वसंगतो विवादास्पदविभ्रमाद्यभ्युप-
गमे शङ्कानविरोधात् यथार्थशङ्केन च सूर्यविवक्षायां नायं सर्प इत्यादि द्विविधविरोधात् तत्त्वादुद्भवात् तार्थविवक्षायां वास्यानाप्तिर्निरसि-
द्धसाधनत्वात्। विभ्रमाद्यनभ्युपगमे तु हेतोराश्रयासिद्धिरिति। किंवा यथार्थः प्रत्ययो ह्यस्माकमसदीयः प्रत्ययो ऽयथार्थः स्यात् यथा।
र्थो वा। प्रथमे तेनैवायथार्थत्वासिद्धिः। चरमेप्यस्या यथार्थत्वे कथं सर्वप्रत्ययया थार्थ्यमिति। नैवंविधः प्रत्ययोस्ति किं तर्हि मिवश-
रमात्रमेतत्पदार्थानामसंसर्गाग्रहमूलमिति चेत्। नैवं। व्यवहारमात्रं च परस्परासंवलितत्वेन व्यवह्रियमाणपदार्थप्रत्ययमूलत्वा।

प्रमा- ऽनयाऽऽदि। विवादाध्यासितो व्यवहारः परस्पराश्रितत्वेन व्यवह्रियमाणपदार्थज्ञानपूर्वकः व्यवहारत्वात् प्रमध्यमवृद्धस्थव्यवहा
५ रवत्। तत्र क्वाध्यविकलो दृष्टांतः। तथा सत्युत्तमवृद्धप्रयुक्तशब्दानामर्थे तत्प्रत्ययजननेन समुत्पन्नविवेषु पुरुषेषु प्रामाण्यपोद्वेस्प्रसं
गात्। संवादित्वं व्यवहारे संसृष्टप्रत्ययोऽपि कारणमस्त्विति सर्वत्रैतद्विचित्र। अत एव तत्र कार्यविलक्षणस्य व्यवहारस्य संवादस्य कारणवै
लक्षण्यापेक्षणादिति चेन्न। अक्षज्ञानयोः संसृष्टयोरसंसर्गाग्रहस्य संवादित्व व्यवहारस्य कारणं विपरीतस्य विपरीतस्येति व्यवस्था। किं संसृष्टप्र
त्ययात्तदुपगमेन। तस्माद्व्यवहारमात्रस्य संसृष्टप्रत्ययः कारणं न तु विशेषस्य संवादित्वं वादिनं ज्ञतिसाधयितुगतशब्दप्रामाण्यमपलाप्य देवा
अपनीयं अन्यथा त्रीतन्न्यायेन शब्दसिद्धिरिति सिद्धिः। तथा पि रजतादिसमारोपसद्भावे किं प्रमाणमिति चेत् एतावंतं कालमिदमेव शु
क्तिशकलं मिथ्यैव रजतमित्यसद्विभ्रमकालानुसंधानात्मकं प्रत्यभिज्ञापरपर्यायप्रत्यक्षं तावदेकं। अपरं चानुमानमर्थं तस्याः स्पृह
णीता किं च शुक्तिकाशकलं रजतात्मना प्रतिभासते रजतार्थिनो नियमेन तत्र प्रवृत्तिगोचरत्वात् सम्यग्रजतवदनांतरीयकप्रवृत्तिगो
चरस्य शुक्त्या इमिनस्य व्यवहारायनियमग्रहणं। किं च। विवादाध्यासिता प्रवृत्तिः पुरोवर्तिगोचररजतज्ञानपूर्विका रजतेच्छार्थी
पुरोवर्तिप्रवृत्तित्वात् सम्यग्रजतप्रवृत्तिवत्। यद्वा। विवादाध्यासितं रजतधीपदं रजतव्यवहारपदत्वात् उभयसिद्धं तत्तथा यथा सम्यग्र
जतं। यत्पुनरदः शुक्तिकाशकलं तदात्मना न प्रतीयते तद्रूपेणासत्। अग्रतुरूपेण सत् तत्तद्रूपेण न प्रतीयते यथा घटः पटरूपेण य ५
था वा शशविषाणं स्वरूपेणेति। तस्य साध्यविकलो दृष्टांतः। शाब्दप्रत्यये घटादेरपि पटादिरूपेण प्रतिभासनात्। अन्यथा परं प्रति दृष्टां
तत्वेनाभिधानस्यैवानुपपत्तेरिति। अत्र तर्हि समारोपं समारोप्यमाणं तु विचार्यतां किमसत् किंवा सत् किं वोभयात्मकं किं वाऽनिर्वाच्यं

कत्तकिंवोलयविलक्षणमिति। न तावदस्मत्र। न त्वप्रतिलामनेदप्रकृष्णोरनुपपत्तेः। नयस्मत्तिनरविषाणादौ अपरोक्षावलासः
काद्दाविडुपक्षस्यतेनापिप्रवृत्ति। तंत्रालिकाद्वैलक्षण्यापादृमस्यैवकल्पितस्यप्रवमाक्रिनितियेशानो। वैलक्षण्याधिकरणावेउद्धस्प
मत्वानुपपत्तेः। तस्यवनिराकारत्वात्। मवैलक्षण्यमात्रेण। स्यात्। निधानमायावादिमतप्रवेशात्। नापिस्वत्र। वाधविरोधात्। यत्र
वाध्यतेतत्तोव्यत्रासीतिचेत्। नानत्रास्याप्रत। तिःकल्पनानर्थक्यात्। नयस्य असलमस्यात्रप्रतीतितुल्यास्येशविषयलेदात्। नहि
नलिनमत्रामात्राद्भ्रमो। नलिनंप्रतिभायात्। तथाप्रतिभासे वाधहष्टथ्या। अयत्र सत्तानकल्पनीयाक्रमस्यैवतयाभूतत्वानेक
स्यसंभवात्। इहनिषेधादृश्यता। त्रियंदद्विवदितिचेत्। मैवं। अधिष्ठानारोपितवादात्म्यनव्यभिचारात्। यद्य स्यत्रापिनात्रिज्ञात
स्त्रव्यापिननिषिध्यतइतिचेत्। अप्रसक्तेस्तादात्म्यवदिहापिनेदं रजतमित्याकारेणतादात्म्यमेवनिषिध्यते। नत्वद्रूपमितिचेत्।
न। तथासतिवनस्पतौ रिवविक्तियोर्द्वयोरप्यत्रैवानंतरंप्रतीतिप्रसक्तेः। प्रतिपिद्यमानयस्य कदाचित्तत्र दृष्टस्य लिंगनमयातुश्रृ
तरजनमस्मिन्नितिवैयधिकरण्ये। नापिज्ञायतएव। अत्रवैदम्यत्र लवकत्वेरवुद्धेर्दृष्टांतरवान्यद्विशुद्धेः॥ ज्वलनसमारोपावसर
गुंजापुंजादौ शरीरदाहादिप्रसंगः। तत्रापितस्याना त्विकत्वात्र प्रसंगइतिचेत्। आपातंतर्हि अत्यंतासत्त्वमनिर्वचनीयत्वंच॥
तथात्वावस्थागमंतरालाभात्। मंत्रेवायम र्थक्रियाक्रमत्राकारइतिचेत्। गुंजापुंजादावपितर्हितदारोपेणदाहार्थीनप्रव
र्त्तेततदाकारस्यसर्वदैवाहष्टशक्तिभावात्। आत्मसमर्थाकारेणसमारोप्यमाणः पुनः प्रवर्त्तयिष्यतीतिचेत्। गुंजापुंजादिरेवतथा
समारोप्यमाणः प्रवर्त्तयतु। किमनेनांतरा। विकेनवहिरारोपितेनासमर्थेनसमर्थात्मनासमारोप्यमाणेनकल्पितेन। तद्वत्

प्रमा। नहि दिङ्मात्रात्केवलसमारोपितस्य सद्भाव इति चेत् [illegible]ना। तथा सति विप्रकर्षेण दृष्टप्रयोगस्य त्वात्। अन्यथातिप्रसंगः। दोषसामर्थ्या
६ द्दर्शनि नातिप्रसंग इति चेत् दोषो [illegible]प्यसदनिर्वचनीयं वा। तादात्म्यं च दूषयितुं दृष्टान्तात् तु आरात् न तत्र च गत्यंतराभावात्। तस्मा
त्रासंताख्या। धियः समारोपणीयमिति सिद्धं। सदसद्रूपस्य उभयस्याविरोधादेवायुक्तः। अविरोधे वा कथं भ्रान्तिबाधव्यवस्था। सर्वा
न्तरयोः रूपयोरप्येकैकांशे यथार्थत्वात्। सदसद्रूपस्य सद्रूपेणोपपत्तौ निर्भ्रान्तिरिति चेत् शान्तं किमिदानीमंशाग्रहणं भ्रान्तिः। तथा चेदिद
विभ्रान्तमेव स्यात्। तत्राप्यसदंशस्यैव स्फुरणात्। सर्व[illegible]ज्ञानानि चैवं भ्रान्तानि स्युः सर्वात्मनार्थानवलम्बकत्वात्। नांशाग्रहणं भ्रमत्वम्।
किन्त्वंशान्तरस्य व्यवच्छेदेन स्वेदमिति सद्बाधायदर्धसंवेदनमिति चेन्न। नाद्वितीयस्य रूपस्य तत्राप्रसक्तेः। अप्रसक्तस्यापि बहुत्वे एकत्वे
न भ्रमत्वे सर्वस्यापि ज्ञानस्य तथाभावः। किं न स्यात्। सर्वस्यापि ज्ञानस्याकियतीति कियति रूपे वर्तमानस्य। प्रसक्तस्य पररूपस्य बहुत्वेन अ
भ्रमत्वोपपत्तेः। तदेवं न सदसद्रूपमध्यारोपणीयमपि तु प्रस्तुपेयं। किं तर्हि प्रसक्तमुभयरूपं। स्यांसदसद्विलक्षणमनिर्वचनीयमेवान्यथा नाद्य
उभयवैलक्षण्यमपि नाधिकमभ्युपगन्तव्यं। प्रायेण प्रसज्यमानविरोधं वैलक्षण्यमप्याधातुं किं हि प्रतियोगिनिरूपणायोक्तिकल्पकाद
न फलान्तराभावे तत्पनायाः सामान्यस्यासंपादनायैव तद्वचनाम्। न हि द्विरूपतयैवात्। लिङ्कस्य तात्त्विकी किमपि तत्र संभवति। नैकत्वमाति
कस्य सर्वस्य विसर्पणान्न्यायमाचिकाः संलब्ध्या। अत एवोक्तं भावार्थवाचस्पतिना। ब्रह्मतत्त्वसमीक्षायां सदसद्भ्यां तयानुलया। द्विरुक्त
रनिर्वचनीयत्वमेव अविद्या नाम विद्यात्वमिति। प्रमाणं पुनरत्र विवादपदमनिर्वाच्यं वा अप्रबाधकं यदुक्तम्। अपि तु भवति तत उक्तसाधनं ६
यथा भ्रान्तयेस्तूक्तसाधनं भवतीति तस्माद्[illegible] नोक्तसाध्यमिति। विपर्ययेऽपि बाधकं तूक्तमेव। तदेवोपपत्त्या प्रतीतिबाधान्यथानुपपत्तिः

प्रवृत्तिर्वा बाध्यबाधानुपपत्तिश्चेत्यर्थापत्तिद्वयमपि तद्वादिनं प्रत्यभिधातव्यं । न चयत्यंताभतियथोऽज्ञनीत्यपनीतिर्निदप्रवृत्तीस्या
त्वं नरविषाणवत् । नापि बहुकृत्सति वाध्यश्चैतत्यवदिति । नवत्वेवं लक्षणमारोपणीयं तथाप्यस्यानात्मत्वे सर्वदोपलंलाद
द्वाधापत्तिस्कादाचित्कतायां शुक्तारूप्यं वाच्यं । नचप्रपंचमात्रिरिक्तिः कार्यत्वनिमित्तमावाद्युत्पत्तिरित्युपादानमपि किंचिदस्तु
पेयमितिवेद्य अस्तुपेयतां तर्हि कार्यवशादेव तदनुगुणोपादाननिमित्तस्योपादानं । निमित्तमावदना ऽस्मिंन्नतिवाहिन् । सविषयस्य
विभ्रमस्यैववासनामात्रात् । अपरमप्यधिष्ठानावलासाद्यन्वयव्यतिरेकान्तु कार्योपादानमप्यनिर्वचनीयमेवाकिं विद्यादिकार्या
नुगुणीकल्पनीयं । नहिताबदस्मत्यसंनवतीति यात्वेकार्यस्यापिसत्यत्वापत्तेः । उपादानोपादेययोस्तादात्म्यदर्शनाद्यथा सुवर्णं
कुंडलमितिवत् । अत्यंताभावो निरुक्तसमस्तसामर्थ्यस्य न कारणत्वं संभवतीति हेतुविशेषणत्वोपादानत्वात् । तस्मादनि
र्वचनीयमेवकार्यवदनुपादानमपि । नचाभावोपघप्रक्रमादित्येतत्परंपरापत्तेः । आत्माचाकार्यादन्वयदर्शनापत्तेश्च । स्व
कार्यानुगतदर्शनश्चेवोपादानत्वादस्तुवाच्यता तस्मादनाद्यनिर्वचनीयमेवरजताद्युपादानं तच्चाधिष्ठानविद्याविरोधाद
विद्येतिगीयते । तदेकार्यतयावादानमिति । तांचसविलासां किलापयदधिष्ठानज्ञानंबाधकमुच्यते । तत्रांतरीयकमिदिरव

प्रमा. त्वमवेनेदं रजतमिति ख्यातं प्रमाणं तूद्यत इति रहस्यम् ॥ सति चैवं प्रपंचोपि स्यादविद्याविनिर्मितः । अविद्यातो विनिवृत्ते
७ ऽतत्त्वाद्रज्जुसर्पवत् ॥ जाग्रद्दृष्टप्रत्यक्षेणार्थो मिथ्यात्वं वा प्रसाध्यते । प्रत्युत एव दृष्टांतो मिथ्यात्वं येन साध्यते । अथायं प्रमा
णिकः प्रपंचः किं वा न । आद्ये कथमविद्यामयः स्यात् । अलीकस्येव रज्जुसर्पादिकस्य । द्वितीये तु तत्र किं स्थूलकथं नान्यथा
सिद्धसाधनमिति ॥ उच्यते । प्रत्यक्षादिप्रमाणानां प्रामाण्यं व्यावहारिकं आश्रित्यायं प्रपंचः स्यादलीकोपि प्रमाणवाह्यः ।
अद्वैतागमवाक्यं तु न तथा वेदनलक्षणी प्रमाणतावं लक्षितं वाधवेद्यमिति तत् । नहि शुक्तिशकलेपि प्रसज्यात् रजतत्वं पाव
स्यार्थपरिच्छेदलक्षणा प्रामाण्यं स्वतः परतो वा विज्ञातं क्षमते । नहि भावलक्षणे वेदनेनस्य प्रामाण्यमीदृग्विज्ञायते । पर
वेदनपक्षे हि तत्त्वात्मानं समपरोक्षस्य कथं प्रामाण्यं गोचरयेत् । स्वसंवेदनपक्षेपि स्वार्थस्यात्यंतिकमबाधमनवगम्य
तु कथं तदुपहितमर्यादं आत्मनः प्रामाण्यमध्यवस्येत् । न च स्वार्थस्यात्यंतिकबाधासत्त्वमसत्यत्वग्राह्यं संवर्तिकालां
तरलविनोदा ध्वंसेदानीमप्योपप्लवे नानुपलंभसंभवात् । परमापि सलक्षणांतरं वेदाद्यसमानयोगक्षेमं कथमत्र प्रवर्तितं । ७
यदा तु प्रत्यक्षस्यैवैतादृशी गतिः तदा केव कथा तदोषकस्यास्युपजीविनो वराकस्यानुमानादेः ॥ परतस्तु प्रमाणत्वपरि

ज्ञानेनैव व्यवस्थितेः। परिहारं प्रयत्नेनापि न पश्यामः सर्वाज्ञमागमवाक्यं तु न तन्नियतकालवस्तुपरिच्छेदकत्वादात्य
न्तिकाबाध्यत्वलक्षणमपि सत्यत्वं स्वविषये प्रत्यक्षवत्। तदवसायाच्च व्यतिरिक्तार्थावगन्तृत्वेन त्वलक्षणं प्रामा
ण्यमव्यवस्थापितं। तथा च श्रूयते। सत्यं ज्ञानमनन्तं ब्रह्मेति। तस्माद्द्वैतागमवाक्यमेव तत्त्वावेदनं प्रमाणमुपपद्यते
न प्रत्यक्षादीति स्थितं। एतेन मिथ्यात्वग्राहकप्रमाणबाधः प्रत्युक्तस्य परास्तः। एवं सांव्यावहारिकस्य सत्यत्वस्य तेनासि
द्धेः। न स्वशरीरात्मकतावस्थालीकत्वेन विरोधात्। यत्तु नरप्रामाणिकत्वे प्रपंचस्य कथं नाश्रयासिद्धं साधनमि
ति। तदप्यसत्। प्रसिद्धिमात्रेणाप्याश्रयत्वे बाधकादर्शनात्। नैवंभूतस्याश्रयः प्रमाणस्पृष्टत्वात् नरविषाणवदिति बाध
कमिति वेद्यं न। एतमेव हेतुं प्रतिज्ञाश्रयत्वानाश्रयत्वयोः प्रमाणबाधात्। यद्यप्येवंभूतमेव प्रमाणस्पृष्टत्वं त्वदीय
हेतुं प्रत्याश्रयः कथमस्मदीयं प्रतिनिमेवं। अविशेषात्। अथ यत्त्वदीयं प्रत्यपितं आश्रयः तर्हि तस्याश्रयासिद्धत्वाद्सा
धनत्वे कथं प्रकृतबाधकतेति। एतेनोदाहरणेप्याश्रयहानिशंका निरस्ता त्वदुदाहरणसाध्यादिति सर्वं सुस्थितं॥

प्रमा तथापीदमुच्यते। किमिदं जडत्वं नाम हेतूकृतं किं वा दृश्यत्वमिति। उच्यते। जडत्वं नाम अनात्मप्रकाशत्वं मम संवि
८ द्रूपत्वं वा पर्युदासात्मकं। दृश्यत्वं तु स्वमव्यवहारव्यतिरेकिस्वदर्शनापेक्षानियतिः विधिमात्रमिति विवेकः। इदं चै
मात्मन्यपि प्रकृतहेतुप्रवृत्त्या वन्नैकान्तिकत्वं स्यात्। मैवं। तस्य स्वप्रकाशत्वात् संविद्रूपत्वाच्च। अतएव तत्तैय
प्रसक्तेः। कुतः स्वप्रकाशत्वमिति चेत्। अत्रायं पुरुषः स्वयंज्योतिरिति श्रुतेः। किं चास्मिन् तावदस्मदर्थे अनुकूलप्र
तिकूलमिति वित्तानंगपहुशादनुकूले प्रवृत्तिः प्रतिकूलाच्च निवृत्तिः। न चेदमवच्छेदकप्रकाशाधीनं स्वव्यवच्छिन्नप्र
काशत्वात्। तद् दृष्टिप्रकाशवत्। अवच्छेदकस्यापि यमात्मानं स्वाश्रयत्वाथो न वित्रुमुत्सहते वस्कत्वात् दृष्टिधारावत्। अन
नुसिधारये वाभिधारा। च्छिद्यते। विषयसंवेदनादेव तदाश्रयस्य तापि सिद्धत्वमिति चेत्। मैवं। संवेदितादिनस्याति
रेकि संविदधीनप्रकाशः। संवित्कर्मतामंतरेणापरोक्षत्वात्। संवेदनवत्। अत। [illegible] ८
[illegible] तत्वा संवेदनवादो। [illegible]

[illegible] धास्येवादि[illegible] ध्यते। विषयसंवेदन [illegible]
[illegible] पारिशेष्यात्स्वप्रका-
शतासिद्धिः॥ यद्वा घटाकारं प्रत्येवं प्रसज्यते संवेदितात्स्वप्रकाशः संविद्कर्मतामंतरेणापरोक्षस्य संवेदनवदिति॥ विज्ञानस्व
पश्चायमात्मा वेदांतेषु गीयते विज्ञानमानंदं ब्रह्मेति अयमात्मा ब्रह्म सर्वानुभूतिरित्यनुशासनमिति यद्विज्ञानं स्वप्रकाशमि-
ति कथं तद्रूपस्यात्मनो नाम प्रकाशता॥ विज्ञानमेव तावत्कथं स्वप्रकाशमिति चेत् अत्र साधनश्लोकः॥ विमता धीः समानाधार-
कालस्वज्ञानहानितः॥ नहीना व्यवहारेणाधीवादवदिमता यथा॥ विमता विप्रतिपन्ना धीः संवित् समानाधारकालस्वज्ञानहा-
नितः स्वसमानाश्रयस्वसमानकालस्वगोचरज्ञानानाधारत्वादिति यावत् नहीना व्यवहारेणा व्यवहार्यानलवदिति धीवाद्वसं-
विद्वारं आविमलता यथा॥ अविप्रतिपन्ना घटसंविन्माप्नोति व्यवह्रियमाणघटसंविदाद्येत्यर्थः॥ एतदुक्तं भवति विवादा-
ध्यासितासंवित्स्वसमानाश्रयस्वसमानकालस्वगोचरसंवेदनविरहप्रयुक्तव्यवहारविरहानलवर्तिसंविदारप्रनंतर-
व्यवह्रियमाणसंविद्वदिति॥ प्रत्यक्षसंवेदनेऽनुसंवेद्यमान घटप्रकाशसमनंतरमेव मयेदं विदितमिति विकल्पोऽनवेशन
स्यावदिते विशेषणे विशिष्टविकल्पासंभवात्॥ न च वेदनांतरं तद्गोचरमनुभूयते अनुभवे वा तद्गोचरमप्यनुभूयेतेत्यनव-
स्थाप्यात॥ आश्रयसमानाद्योगक्षेमत्वात् आत्मा यावत्रीरवत्वाद्ययदृष्ट सामग्री मनःसंयुक्तात्मसमवायलक्षणादृष्टांसाद्भिती यादाव

प्रमा
९

प्यविशिष्टेति कथं तदपि नानुभूयेत तान्वाद्दृष्टमात्रवैकल्यादिति शंकनीयं तस्मात्रवैकल्याश्रयाकारानुत्पत्त्यनुप
पत्तेः। उपपत्तौ वा समनंतरेंद्रियसंनिकृष्टाः स्थिता लोकमध्यमध्यासीना अकरिनरतुरगादयोपि कदाचिन्नवीक्षेर
न्। तथा चयोग्यानुपलंभादत्र च निर्णयः क्वापि तल्लवेद्युतत्यापि सोप्युप्रयत्नवद्दवांतरवैजात्यादनुपलब्धिर्नवेदि
तिवेद्य। तदेवं मतत्र तथाप्यन्यथासिद्धं कार्यमस्तित्वदर्शनेन तस्याः वश्यं कल्पनीयत्वादनुपलंभादिनेहतयाविधं
कार्यमस्ति। विशिष्टवेदनमेवावापि तथाविधं कार्यमिति चेद्। न। तस्याविशेषणवेदनमात्रेणप्यरितार्थत्वाद्। भेदाग्रे
हयोरुदासीनत्वाद्। यदस्तु तत्स्वातिरिक्तेनैव वेदनेन स्याप्यमिति स्यात्। संवेदनं कल्पनीयमिति चेद्। न। अनेनैव स्यात्संवि
वेदनेन त्याग्निचारात्। इदं हि वक्तृमात्रं व्याप्नुवदात्मानमपि व्याप्नुयात्। किंच प्रत्यक्षसंवेदनमप्रत्यक्षसंवेदनं सर्वं कार्यमका
रणकं सर्वं वक्तृसात्मकमित्यादिसंवेदनानि स्वपरसाधारणप्रयोजकवशाच्चात्मगोचराण्यपि वकुलमुपलभ्यं तद्व्यति
कथं तस्य निवारणपरंपरा। परगोचरयत्नवत्यात्मानमपि गोचरयंतीति चेत्। घटसंवेदनमपि तर्हि घटं गोचरयदेवस्वा
त्मानमपि गोचरयती ति न विशेषः कश्चित्। स्वपरसाधारणप्रवृत्तिनिमित्तगोचरतयैव स्वगोचरत्वं तद्दृष्टमिति चेद्
वा। अस्त्ववैधर्म्यमात्रमात्रत्। सर्वथा च साम्यसंपादनीयत्वे प्रमाणाभावात्। प्रदीपवच्चात्र प्रवृत्त्युपपत्तेः। यथा खलु प्रदीपः
परत्र विज्ञानलक्षणं कार्यं कुर्वन्। नयापि खलावलेदादेव तत्करोतीति न तु दीयांतरमपेक्षते। तथा विज्ञानमपि परत्र व्यवहार

कार्यंकुर्वत्स्वभावभेदादेवग्राह्यनियमव्यवहारंकुर्याद्विज्ञानांतरंतेनापेक्ष्यतइतिकिंनस्यात्३।अतएवोक्तं।एकं
कस्यचिद्ग्राह्यद्वयमेवप्रकाशकं।अन्यतमनपेक्ष्यनैकमप्यप्रकाशकाद्व्यतिरिति।तस्माद्ग्राह्यसंवेदनस्यवेदनां
तरवेदनीयत्वेऽनवस्थाप्रसंगलक्षणस्तर्कोपिकृतानुपलंभादेवतस्यास्तावत्सिद्धौपरिशेषात्स्वप्रकाशतासिद्धिः।उक्तं
वाऽसंविन्नोविन्नेनखलुतदुपाधिर्व्यवहृतिःपतातावन्यस्योप्रसरसमनवस्थाप्रसरतीति।एवंवेदमप्यनवकाशं
यदाहुरेके।स्वात्मनिवृत्तिविरोधात्स्वसंवेदनंविज्ञानमिति।व्यास्यादिवेदनवत्प्रदीपवच्चोपपद्यते।नचतत्रस्वपरसं
गतकार्यानुकूलात्स्वभावभेदाद्ग्राह्यात्मनिवृत्तिरग्राह्यक्रियाविरुध्यतेतिचेत्३।प्रकृतेपितर्हिस्वपरव्यवहारानुकूला
स्वभावभेदात्स्थानकावनप्रसंगंचारोहकल्यावृत्तिःयाविरुध्यतेतिसर्वंसमंजसं।एतेनावीतोप्यत्रवेदनत्वादि
तिप्रावामाचार्याणांहेतुःसमर्थितःप्रतिपदेबाधकदर्शनात्३एतदर्थमेवबालिमतविशेषदुष्कारेणैवतत्वदर्शितं
तस्मात्स्वसंवेदनसंवेदनाभेदात्प्रत्यात्मप्रकाशत्वमितिसिद्धं।एतावताशास्त्रसर्वप्राप्तिलाभितत्वसाधनायोक्तंविज्ञान
नतुमिति॥ ॥कथंपुनरविनाशिनोविज्ञानस्यनित्यात्मस्वभावतासंलाभिनीन।विज्ञानस्यापिविनाशासिद्धेः।नीलादि
संवेदनस्य समयपीतादिसंवेदनादर्शनात्विनाशप्रतीत्यात्समिद्धिरितिचेत्३।न।पीतादेरुपदर्शितस्यैवसंवे
दनदर्शनात्३।विनाशप्रतीतेरपिघटाकाशादिवदौपाधिकत्वेचेन्नैवोपपन्ने।अज्ञानतस्त्वसंवेदनेभेदानुपलंभा

तमेद

दसे स्वसिद्धेन प्रयोगश्चासंविद्रूपं तग्राहकत्वात्तेदोपाधिमंतरेणाविशार्य्यत्वे सदत्वादाकाशवदिति। एवं वा सद
संसिद्धौ संविद्रूपाराध्य संतवात् आत्मनः स्वप्रकाशत्वमनिवार्यमिति स्थितं। तथा च कृतः प्रहकतहेतोरनैकांति
कत्वं काचवकाशः॥ तथापि स्वप्रकाशत्वादिति यत्त्वादिसाधकस्य तदसात्मत्वापि दृष्टेनैरवर्जनीयं तस्यापि दृ
श्यत्वमिति कथं नानैकांतिकं दृश्यत्वमिति चेत्। सत्यं कथं विस्मरणशीलता देवानां प्रियस्य नहि दर्शनीय
त्वियोगितामात्रं लक्षणं दृश्यत्वं हेतुः अपि त्वस्वव्यवहारे आतिरेकि स्वदर्शनापेक्षानियामिरित्यवोचाम। नचो
पाधिकात्मविकल्प्येतदुपनायकप्रमाणापेक्षायामपि स्वरूपमात्रस्य व्यवहृतौ तदपेक्षाप्तीति कुतो यथोक्त
हेतोरनैकांतिकत्वावकाशः॥ विशिष्टस्फुरणेपि वस्तुस्वरूपमदृष्टपामित्युदितमन्यत्र नेह विपंच्यते संग्रहाधिका
रात्। अन्यथापि चसाध्यस्य समर्थितत्वादिति। जडता दृश्यता च्चाकृत्स्नत्वच्छेवेति चेन्मतं मैवं संवित्संबंधे
म्यसिद्धिप्रसक्तितः॥ यस्याहि जडता दृश्यता वा निरूपणीया तस्य धर्मिण एवासिद्धौ कस्य ते निरूप्येयातां न च
तदसंबद्धं संविदा सिद्धं नाम स्यात् नो खलु तत्स्वयं सिध्येत् जडत्वादेवं नापि संविदा। तया सह संबंधानिरूप १०
णात्। न हि संवित्संवेद्ययोरंतर्वहिर्लीवेन प्रकाशमानयोः संयोगादिः संभवेत्। विषयविषयिभावोपि संबंधो
भवन्नतीताहो कथं भवेन्न ह्यसतिसंबंधिनि संबंधो नाम भवेत्। न चातीताद्यपि न संविदितं न च संविदसंस्पृ २

ष्टं संविदितं चेन्निःसृत्यतेतिप्रसंगात्॥ हेतुहेतुमद्भावश्चानागतादावसंभवी संबद्धसिद्धावस्थ स उत्पादितः। एतेनैको
तःकरणसंक्रांतावस्यैवसंबंध इतिनिरस्तं। असत्त्वोतीतादेरवतः संक्रमायोगात्। सत्त्वेवातीतत्वानुपपत्तेः। संविद
श्चासंगाया अप्रतिसंक्रमत्वात्। अंतःकरणस्य तच्छायता तत्र संक्रमणमितिचेत्। अथ केयं तच्छायता नाम नेनताव
द्वृत्तदात्म्यमनस्यादात्म्यपत्तावविवेकं विरोधात्॥ अथाविवेकेन तादात्म्यसंसर्गो वा न परमार्थतो दृश्यं दृष्टं स्यात्। असत्यत्वेऽपि
दृश्यत्वस्यागगनगंधर्वनगरयोरविशेषात्। ध्येयमावरणवत्संविसंवेद्ययोरप्यलीक एव संबंधो न विप्रतिपत्तिद्वयाद्वैत
संविदितं नवेद्गंधर्वनगरवदेवेतिसर्वमवदातं। एतदप्युदितमसत्यमेवेदमिति॥ निश्चितत्वात्तिभेदः प्रपंचः असत
त्यो भेदोयस्मिन्नतदसत्यभेदमित्यर्थः। अथैवमपि प्रपंचस्य मिथ्यात्वेतदंतःपातिन्याः श्रुतेरपि तथात्वात्कथंप्र
ब्रह्मणि प्रमाणं नवेत्। नायं दोषः। मिथ्याभूतस्याप्रतिबिंबस्य सत्यबिंबबोधकत्वेन तत्प्रामाण्योपपत्तेर्निर्वाह। अ
नकामिच्यायाश्चस्वप्नस्य सूचकत्वेन तथा लाभात्। पठंति हि स्वप्नाध्यायविदः। यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु प
श्यति। समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने इति। पारमार्थिकब्रह्मस्वरूपोदाहरणीयं स्वप्नसूचकश्रुतेरारचनत्वे
ष्टतद्विरमति। नचकल्पनीयं तच्चापि प्रतिबिंबादिज्ञानं सत्यमेवबिंबादिज्ञानं तन्नकृतत्वात्प्रमाणं न चलीको
विषयत्वेविज्ञानमात्रस्यानवच्छिन्नस्यातिप्रसंगित्वात्॥ विषयावच्छिन्नस्यैव प्रमाणत्वात् तस्याप्यवर्जनीयत्वा

त्पप्रामाण्यस्य। एतेन ब्रह्मणोऽप्रत्यक्षत्वेनुपपत्त्योरहेतुत्वादुपपत्तिरहितत्वपदमस्तं। अलौकिकेनैव प्रमाणेन तदुपपादनादित
रमतिप्रसंगेन॥ ॥यत्त्वेवमपि शब्दानां संगतिग्रहणसमये कार्यान्वितपरतयैव तद्ग्रहात्सति कार्यान्वयेन स
म्भवति ब्रह्मणि तु स्वयंसिद्धत्वात्प्रामा एवं न वलोकवदवलक्षणं। अयमर्थः पुरुषविकल्पानुगतिनीमकारणमन्वितस्य
व्युत्पत्तिविधिनिष्ठमेव वेदान्तानामपि प्रामाण्यमिति मन्यते तत्प्रतिबोधनायेदं प्रयुज्यते। विवादाध्यासितानि प
दानि न कार्यान्वितस्वार्थं निपत्तसामर्थ्यानि पदत्वात्कार्यपदवदिति। न च साध्यविकलो दृष्टान्तः। एकस्मिन्नपि वा
क्ये तु द्वे पदे तात्पर्यकार्यद्वयासंभवेन कार्यपदस्य तादृक्कार्यान्तरान्वितस्वार्थगोचरतासंभवात्। साध्यमात्रस्य
चलाभावार्थी देवत्वेनानंगीकारात्। विपर्यये तु योग्येतरान्वितस्वार्थमात्रस्य सर्वपदसामर्थ्यप्रयोजकतायां संभव
त्यां कार्यपदातिरिक्तानां कार्यान्वितस्वार्थे सामर्थ्यं कार्यपदस्य तु स्वरूपेणान्विते चेति प्रयोजकद्वैविध्यांशकि
रे गौरवप्रसंगो बाधकस्तु ज्ञेयः। यद्वा कार्यं न समस्तपदसामर्थ्यप्रतियोगि अन्वयव्यतिरेकित्वात्पदार्थान्तरवत् कान्वयातिरिकत्वात ११
तत्रापि समस्तसतित्वकार्यं योग्यतामात्रेणापरस्परं पदार्थानामन्वयोपपन्नो कार्यस्यापि समस्तपदसामर्थ्यप्रति
योगिताकल्पने गौरवमेव कल्पनांस्यात्। यद्वा विवादाध्यासितः शब्दव्युत्पत्तिगोचरः प्रमेयत्वाद्भुल्यान्निमतप्र
मेयवत्। विपर्यये तु व्युत्पत्तिरशायां योग्यान्वितस्वार्थपदसामर्थ्यमंगीकृत्य कार्यस्यापि तत्र दर्शनमात्रेण योगपका २

योन्वितेतरगतिश्चयोजकोपादानेनाबाधार्थस्यैवचकार्यत्वस्यापिनस्वरसादर्शनात्। योग्यताबाधार्थरूपकार्यान्वयप्रयो
जकमुपादेयत्वात्। तथाचवेदेऽबाधार्थातिरेकिनियोगकार्यान्वयोनसत्वादितिदूषणं। एवंस्थितेसिद्धेप्यर्थेप्रामा
ण्यायप्रयुज्यतेविवादाध्यासितोघुख्ययाहृत्याशब्दःप्रमेयःप्रमेयत्वाद्वयाविमतप्रमेयवत्। विपर्ययेतुतत्रतत्र
दृश्यमानोप्रक्रमोपसंहारैकवाक्यादिपर्यालोचनतात्पर्यलिंगसंगतसंगतः। पूर्वोक्तानीतास्तुस्वप्रत्वसत्वेनलक्षणाप्रपणेन
बाधकमिति। एतच्चपराभिमतंकार्यमंगीकृत्यबोध्यमा। वक्तृतत्त्वतदनंगीकारेपिप्रयुज्यतेवेदःसिद्धएवार्थेप्र
माणंप्रमाणत्वात्। वक्तृभर्त्रपराभिमतकार्यविपरीतत्वसिद्धोर्थोविवक्षितोनतुनिष्पन्नत्वादिः। तथाचसविषयदनुमा
नेनानैकान्तिकत्वं। नापिविधिवाक्येनबाधितविषयत्वंतत्रापियत्रपरतंत्रश्रेयःसाधनाविशेषात्मनोवाक्यार्थ
स्याभ्युपगमात्। विपर्ययेतुपराभिमतकार्यत्वेइंद्रियासंगतेलिंगाद्यभावाच्चासिद्धेस्तत्रसंगतिग्रहणानुपप
त्तेरगृहीतसंगतिकानांपदानांबोधकत्वानुपपत्तिर्बाधिका। नचममेदंकर्तव्यमितिज्ञानादेवतत्सिद्धिरिति
वाच्यं। विकीर्षायाएवकेवलमेवंप्रतीतावात्। तदतिरेकिणःप्रमाणविज्ञातत्वेवंविधत्वस्यरूपावप्रमाणाभावा
त्तेततःप्रमेयत्वेदासिद्धेः। विकीर्षायाश्चपयत्रपरतंत्रश्रेयःसाधनत्वबोधादेवलौकिककार्यज्ञानकारणत्वा
भेनाभ्युपगमात्तुपत्त्युपपत्तेः। तदर्थमपिकार्यज्ञानकल्पनानुपपत्तेः। कृतियोग्यतामात्रस्यतुकार्यत्वस्यकृतत्वंवाय

व्यतिरेकाद्वसेयस्यानिष्टादावपि संतवेनाप्रवर्त्तकत्वात् लिंगाद्यर्थतानुपपत्तिः क्रतूद्देश्यतापि तु तदतिरेकि
णी फलाद्यधिकरणामतस्तदसौ यत एवेत्यपि प्रत्यपमात्र तच्चात्रु नयसिद्धस्तिकार्यगोचरता मात्ररूपा याप
वात्तु त्वात् । विपर्यये प्रमाणस्य दर्शनात् । वाक्यात्तथा विद्यापन्नं प्रत्यप्रतिपादकत्वात् । तस्मात्परामि मतका
र्यस्यैवाप्रमाणकत्वात्तत्र संगतिग्रहणानुपपत्तेश्च न कार्यतागोपि तद्बोधकः किंतु न ब्रह्मणमात्र इति सिद्धं ॥ ॥
यत्तु वेदांतानामपि प्रतिपत्ति विधिनिष्ठत्वमिति तदप्यसत् । ब्रह्मणि हि प्रतिपत्तयपि विधिष्यमाणेषु शाद्वीभा
वनात्मिकासाक्षात्कारस्वरूपा वेति । तत्र शाद्यात्मलब्धत्वादेवास्य नो विधिविधेयत्वं अनुत्पन्नो वा शक्यत्रमविज्ञा
तस्वरूपत्वात् । भावनाया स्फुटलाभ्यासात्साक्षात्कारहेतुत्वा चस्याव्ययव्यतिरेकगम्यत्वादनर्थक एवात्रापि विधिः भसा
क्षात्कारस्वरूपा पुनः परमात्मनं द्रव्यो वस्तावाम्फलमेवेति कथं तत्रापि विधेरवकाशः स्वर्गवत् । किंच यस्तु कर्त
व्ययत्नपरतंत्रं कर्तुमकर्त्तुमन्यथा कर्तुं शक्यं तद्विधेयं यथाज्योतिष्टोमः प्रतिपत्तिस्तु प्रमाणादिमात्रपरतं
त्रा न ताहृगिति कथं साविधीयेत तस्माद्यामाद्रष्टव्य इत्यादयोपि विधिसरूपा वेदांतेष्वाससमाना श्राद्धाः कथंचि १२
द्रहीर्थत्वेन विधिरूपं श्रुयष्टव्य इत्यादिवदर्थवादतयाव्याख्येया ॥ अन्यथोपक्रमोपसंहारगततसिद्धात्मतत्त्वा
ख्यानेकरूपाविरोधात्स्थिति । तस्माद्वैतविज्ञानसुखस्वरूपे प्रमाणतां ब्रह्मणि प्रतिपद्यंते वेदांता इति सांप्रतं । ४ ॥ ४

अथैवमनेकपदार्थसंभेदात्मनि वाक्यार्थे कथमद्वैतपरमागमवाक्यं प्रमाणं स्यात् ॥ अत्र ब्रूमः तन्नेदयोरत्यंतविरोधात्
अत्रोच्यते । द्विविधं तावदखंडत्वं । एकं पदार्थनिष्ठं अपरं तस्यात्मतादात्म्यरूपवाक्यार्थनिष्ठमिति । तत्राद्यमखं
डार्थतायामनुमानमुच्यते विज्ञानादिवाक्यं मखंडार्थनिष्ठं लक्षणवाक्यत्वात् पृथुबुध्नोदराकारो घट इत्यादि
वाक्यवत् ॥ न च साध्यविकलो दृष्टांतः स्यात् ॥ घटप्रातिपदिकार्थमात्रं पृष्टं तं प्रति तत्स्वरूप एव प्रतिपाद्यत्वात् ॥ अन्यथा अ
पृष्टः कोविदारानाचष्ट इत्यनवधेयवचनत्वप्रसंगात् ॥ न च पृथुबुध्नादिकं घटपदार्थः किं तु तद्धर्मः पृथुबुध्नं घ
टस्येत्यादिप्रयोगदर्शनात् ॥ तथाप्यनिष्टत्वं यद्वदेदेनैकएव घटप्रातिपदिकार्थः पृथुबुध्नादिभिरनेकैरुपलक्षणात्म
निःपदार्थैरुपलक्षणीय इत्यखंडार्थतासिद्धिः ॥ एवं विज्ञानानंदादिवाक्येपि विज्ञानत्वादिसामान्यानिष्ठानि
ज्ञानादिव्यवच्छेदेन तदाधाररूपामेकामेवानंदव्यक्तिं ब्रह्मलक्षणत्वेन लक्षयंतीति विपक्षे बाधापि लिलक्षयिषिताद्वि
तीयार्थासिद्धिप्रसक्तिर्बाधिका ॥ द्वितीयेप्यखंडार्थत्वं सिध्यत्युच्यते तत्त्वमसि वाक्यमखंडार्थनिष्ठं कार्यका
रणद्व्यनिष्ठत्वे सति समानाधिकरणत्वात् सोयं देवदत्त इत्यादिवाक्यवत् ॥ न च साध्यविकलो दृष्टांतः ॥ तदेतद्दे
शकालोपलक्षणीयस्यैकस्यैव देवदत्तस्य स्वरूपं प्रत्यभिज्ञा तस्याविरोधविभ्रमनिरासेन परस्मै प्रतिपाद्यमानत्वा
त् ॥ अपरस्यात्र कस्याप्यंशस्याविवक्षितस्यासंभवात् ॥ एकवाक्यापि विवक्षासद्भावेन प्रागेव सिद्धत्वात् ॥ आरोपि

तत्पदार्थावभासकस्याव्यतिरेकिणः प्रतीत्याभेपि विरोधाभावात् त्यागांशएव विलाप्यानभ्युपगमात् । तत्त्वमस्यावाक्यम्
नयैवदिशाखंडार्थतास्युपगमादिति । विपर्यये तत्रापि विवक्षितार्थासिद्धिरित्येषणमिति सर्वं निर्मलं । एवमानंदरूपे
यं विज्ञानघनान्तर्यामीनः । विश्वरात्मात्मनं ज्ञात्वा विमोक्षाय निरूप्यते ॥ ॥ कः पुनरयं मोक्षो नाम । नित्यनिरतिशय
सुखाभिव्यक्त्या भातिःशेषदुःखोच्छेदः । स्वाविद्या स्वमय एवा । न स्याविद्यातोन्या स्वसंवेदनस्य सुखस्य । नाभिव्य
क्तिर्नाम । सापि कथमनाभिव्यक्तिरिति चेत् । आत्माभिव्यक्तिः कार्यस्यात् अप्रकाशतस्तिष्ठव्यवहारस्य प्रतिबंध न तद्धिक
ट्स्थता प्रकाशतस्तिष्ठव्यवहारस्य कारणत्वात् । कार्यतो विशेषं दुरस्कृत्य पर्युदासेन तत्तु प्रसज्यप्रतिषेधात्
प्रायेण स्वसंवेदनस्यानित्यत्वतस्मं सर्वात् । एवं दुःखमपि स्यात्मनिष्ठाभावा । वेकं तत्त्वस्यानित्याानंदस्वभावाविरोध
त्त्वानाप्यागं तु कं वा स्वयमद्वैतेकारणांतरासंभवात् द्वितीया द्वैतेऽयं भवतीति श्रुतेः । कार्याणां चागंतुकानां तदर्थी
नत्वनियमात् । तस्माद्याध्यात्मिकादिदुःखत्रयमप्यविद्यात्मकमेव । नैवकारणनिवृत्तिमंतरेण आदिकार्यस्यात्यंति
की निवृत्तिर्भवति तस्मादविद्यानिवृत्तिरेवानतिशयसुखाभिव्यक्तिरशेषानर्थनिवृत्तिश्चेति गीयते । अनाभिव्यक्ति १३
पदवेदनीयाविद्यानिरासात्मकत्वादशेषानर्थनिवर्तकतदुपादाननिवृत्त्यात्मकत्वाच्च । सर्वथैवमविद्यास्वमयो मो
क्षः सर्वतु नाथमशेषदुःखोच्छेदरूपत्वात्पुरुषार्थः सुखस्वभावस्तत्र कथं पुरुषार्थः स्यात् आत्मातिरेकिण एवतस्य तथा । ५

दर्शनाद्ज्ञानात्। प्रतीतः प्रकाशमानस्यानतीतस्य तथात्वाभावात्। अतिरेकस्याप्रयोजकत्वात्। अन्यथा परस्य स्वस्यापि
पुरुषार्थत्वप्रसंगात्। आत्मसमवेतं तत्तथेति चेत् न। अतीतस्यापि तस्य तथात्वापत्तेः। अनतीतमात्मसमवेतं तत्तथे
ति चेत् न। समवायस्यासंबन्धात् संबन्धत्वविकल्पासहत्वेन दुर्निरूपत्वात्। संबन्धत्वे प्रत्यक्षपराहतसंबन्धपरंपराप्र
संगात्। संबन्धिनोर्विलक्षणयोरवच्छेदेन प्रत्यक्षयोः संबन्धस्याप्रत्यक्षतानुपपत्तेः। असंबद्धत्वे च तयोरयमितिव्य
वस्थानुपपत्तेः। निरूप्यनिरूपकत्वावच्छिन्नसंबन्धोत्तरकालत्वात्। अन्यथा सौधस्थितिबोधेऽपि परिणततालफलका
लिङ्गानिरूपणापातात्। नाशस्यापि विनाशिना तदीयतयाध्यक्षस्यैव निरूपणमित्यस्याविचारात्। तस्मात्प्रत्यक्षप्र
काशमानमनतीतं सुखं पुरुषार्थ इति वाच्यं। वर्त्तमानेऽपि क्षणानुवृत्तेरनागतस्य वाध्यमानतया पुरुषार्थत्वात्।
एतावतापि उपपत्तौ किमतिरेकलक्षणेन। दर्शनकथं तत्संबोधमन्तरेणापि दृष्टत्वात्। देवदत्तादृष्टेन दुःखानुषंगा
पि सर्वपुरुषार्थानुबन्धी तत्प्रयोजकत्वात्। ततश्च तज्ज्ञाचयं मोक्षाय प्रवर्त्तते अस्त्यमिदमुच्यते च्छायोर्थमप्य
वं प्रवर्त्तते ऐहिकस्यैव पुरुषार्थत्वदर्शनात्। आमुष्मिकं सुखं तत्वदप्यपुरुषार्थो न दृश्यत इति चेत्। प्रत्यक्षप
काशमानमनतीतं सुखं तावदप्यपुरुषार्थः कस्यते येनातिरेकोऽप्यपेक्ष्येत। नन्वसिद्धमेतत्। विदां व्याप्तितद्रूपार्थः
प्रत्यक्षप्रकाशमानानतीतानंदत्वात्। तादृग्विषयानंदवादिति। तस्मादानंदसंकीर्त्तनमप्यत्र सोपयोगमेव। अन्यथा

सकलदुःखोच्छेदवत्सकलसुखोद्भेदस्यापि संसारादप्रवृत्तिरेवात्र प्रेक्षावतां स्यात् । अलं तद्दुःखोद्विग्नानां सर्वेदेवात्र प्र-
वृत्तिर्मरणइव पृथग्जनानामिति चेन्नमैवं दृष्टांतवैषम्यात् । नीरूपपरोगयस्मादुःखमयीमिवमूर्त्तिमुद्वहंतः सुखले-
शमप्यलभमानास्तथाप्रवर्त्तंतां नाम । संसारिणः पुनरल्पदुःखानुविद्धमतैकविधमयि देहेरूपगतोद्यानंदमप्य-
लभमानाः कथं तत्यागमिच्छेयुरिति चेन्नैवं प्रवर्त्तेरन् नयन्नीर्णलया दाहारपरिस्यागोरिति क्रुक्कमयाच्छाह्याल्पनाभिः अयण-
मितिप्यकामयाज्ञापरिधानाविमोकः शीतार्त्तश्चेति । तस्मात् । अविद्यास्तमयो मोक्षो नित्यानंदप्राप्तिरिति । निःशेषदु-
खोच्छेदाय पुरुषार्थः परो मतः । स चायं केवलज्ञानसाध्यत्वात् । अविद्यास्तमयत्वात् । रज्जुविद्यास्तमयवदिति । नहि र-
ज्जुयाथात्म्यापरिज्ञानारोपितसर्पविद्यास्तमयः कदाचिदपि लंवतेयेन नत्वमसहकार्यंतरापेक्षाभ्युपेयेत । विपर्यये च यन्मात्राद्यज्ञा-
नीयं दृष्टं तज्ज्ञानीयस्येव कदाचित्तदतिरिक्तादप्युपपन्नो तद्धेतुकारणलक्षणं व्याहन्येत व्यतिरेकासंभवात् । तस्माददै-
तात्मसाक्षात्कार एव मोक्षकारणं । अत एवोक्तं । तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति । तमेवं विद्वा- २५
नमृत इह भवति नान्यः पंथा अयनाय विद्यत इति च । ज्ञानादेव तु [illegible] कैवल्यं प्राप्यते येन मुच्यत इति च । कर्मणां पुनर-
विद्यानिबद्धोपसर्पणादिवत् संपत्त्ये वोपयोगः । तथा च श्रूयते । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दा-
नेन तपसानाशकेनेति विविदिषासाधनत्वेन कर्मणामुपयोगः । न तु साक्षान्मोक्षेऽस्त्यर्थः । अस्येतत्तिग [illegible] मिषतीतिस ६

वि-

द्व्याख्यानेपि वेदनसाधनं नैवस्थ्या ऽन्नं तु मोक्षसाधनता। स्मर्यते च। धर्मात्सुखं च ज्ञानं च ज्ञानान्मोक्षो ऽधिगम्यत इति। कषायपक्तिः क
र्माणि ज्ञानं तु परमा गतिः। कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तत इति॥ आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारूढस्य
तस्यैव शमः कारणमुच्यत इति वा। निषिद्धस्तेन सांख्यं कारणभावः कर्मणां। न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमा
नशुरिति। एके संसारविरक्ता अमृतत्वमानशुः केन न कर्मादित्यागेन न तु कर्मादिनेति योजना। न चैकेन त्यागेनापरेण चान्यथापी
तिनान्यत्र सर्वसंत्यागान्मोक्षं विंदंति मानवा इत्यादिविरोधप्रसंगात्। त्यागश्चावविज्ञानद्वारेणैव मोक्षकारणमिति मतेति ज्ञा
नादेव तु कैवल्यमित्यादिश्रुतिविरोध एव। अत एवोक्तं। श्रुत्वैव मे तं श्रुतवित्तत्त्व शुद्धमसंगमात्रेण दृढेन छित्त्वा। ततः पदं तत्परिमार्गि
तव्यं यस्मिन्गता न निवर्तंति भूय इति। केवलस्य तु त्यागस्याज्ञस्यालोकप्राप्तिहेतुत्वं संन्यासादुत्थानं ध्यानमित्यादिवचना
द्रष्टव्यं यते। यत्तु विज्ञानकर्मणोः समुच्चयाय पठंति अंधं तमः प्रविशंति ये ऽविद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायां
रताः॥ विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इति। तदप्येकैकनिंदया पि क्रमसमुच्च
यपरमेव विद्या ह्यविद्यया मृत्युं तीर्त्वा पश्चाद्विद्ययामृतमश्नुत इति पौर्वापर्यश्रवणात्। सह वेदेति वेदन एव सहत्वश्रवणा
त्। केवलविद्यानिंदा तु साधनापरिपक्वविद्याविषयत्वेन विप्रतिपत्तिरन्ये पादस्य योजना। अंधं तमः संसारं प्रविशंति ये विद्यास्वल
बाह्यविद्याविपरीतत्वात् ह्यविद्यां कर्मोपासते आद्रियंते अनुतिष्ठंतीत्यर्थः। ततः तस्मादपि तमसो भूय एव बहुतरमेव ते त

मः प्रादिशंतीयत ये अविद्यायां अपरिपक्वात्मज्ञानलक्षणायां रता अज्ञा सम्यक्संन्यासेनाकृतकृत्यं मन्यमाना यथा प्रविहिताशेषक
र्मत्यागिन इत्यर्थः। एतदुक्तं भवति विद्यायाः अपरिपाकात्प्रागेव यथाप्रविहितं नित्यादिकर्म त्यजंति ते पापमुपान्नदुरितद्वयाभा
वाद्विहिताकरणनिमित्तस्य च पापभूतः प्रत्यहमुपचीयमानत्वाच्चाशुद्धांतःकरणानां विद्यापरिपाकस्य युक्तविषयमा
त्रेणापि कारणाभावेनासंभवात् संततिक एवाधः पातः स्यादिति। कस्तर्हि श्रेष्ठ तत्त्वं लभते तेषत्तत्राह विद्यां च परिपक्वात्मज्ञानल
क्षणामविद्यां च कर्मलक्षणां तदुभयं यः सहोपायोपेयभावेन वेद जानाति सः अविद्यया कर्मणा दृष्टसंचितविद्योत्पत्तिप्रतिबंध
कं पापं तीर्त्वा विद्यया परिपक्वया आत्मसाक्षात्कारलक्षणया अमृतं निर्वाणमश्नुत इति। तदिदं तत्त्वमात्मविद्यापरिपाकाद
र्वाक्प्रविहितं कर्मानुष्ठेयं विद्यातु परिपक्वा कर्मनिरपेक्षैव मोक्षं साधयिष्यतीति यत्तु तत्त्वात्ति हेतुर्ज्ञानं च कर्म चोक्तं म
हाभारतेऽप्यत्रापि साक्षाज्ज्ञानं तद्वारेण च कर्मेति गमयितव्यं अन्यथा ज्ञानादेव तु कैवल्यं नान्यः पंथा विद्यत इत्यादि विरो १५
धप्रसंगात्। यत्तु तन्न्यायान्न मधु संयुक्तं मधु वा न्नेन संयुतं। एवं तपश्च विद्या च संयुक्तं भेषजं महदिति। इत्यादावुपसमुच्चयपरं
प्रतिभाति तत्सर्वं परिपक्वात्मविद्याव्यतिरिक्तस्याविद्यायाः कर्मणां च तत्तुल्यादेशमुच्चयं प्रतिपादयतीत्यभ्युपेयं तथा चोक्तं
नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयं। ज्ञानं च विमलीकुर्वन्नभ्यासेन तु पाचयेत्। अभ्यासात्पक्वविज्ञानः कैवल्यं लभते न
र इति। यत्तु कर्मणैव हि संसिद्धिमास्थिता जनकादय इति तत्र संसिद्धिः सम्यगवबोध एव लप्स्यते। सिद्धिं प्राप्तो यथा ब्रह्मत १

याप्नोतिनित्योधमेश्नतिप्रामसद्रव्यगतिवानादिसिसकलमना क्रलं।तस्मात् ३ अविद्याभ्रमयोमोक्षोनवेदि हैकदेव
कः।तु स्यात्कृतिस्मृतिभ्यां वक्षीकर्त्तव्योमनीषिभिः॥२॥सदादिश्य आश्लिष्टोऽभ्युप्रकारस्परिशेषतः।युक्त्यासम्युपपद्यते तन
थैवपरिकल्प्यतां।प्रमाणमालागुणसंगतेयमपेतदोषाविहिता दरेण।प्रसाधयंती परमं तुमांसं प्रकल्प्यतांसाधि
नसिद्धयेवः॥३॥आत्मस्थलावमाधिकृत्यसुकंदमेषामातानाविधानतवरत्नमनोज्ञमाला।आनंदबोधयतिनानिधि
नागुणानामानंददेवरकलंकाधियाध्यधायि॥४॥इतिश्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीमदानंदाचार्यकृ
तंप्रमाणमालाख्यंग्रंथकरणंसमाप्तम्॥ ॥शुभं॥ ॥संवत् १५८५ समए चैत्रसुदि १४ शुक्रे॥ ॥श्रीरामार्प्पणमस्तु॥ ॥

१६

इति

प्रमाणमाला समाप्ता

आनन्दाचार्यप्रणीता

१०५
२(B)

105
2(A)

105
2(A)

अथ

अद्वैतप्रमाणमालाप्रारंभः

आनन्दाचार्यप्रणीता

105
2(A)

105
2(A)

अथ

अद्वैतब्रह्मप्रमाणमालिकाप्रारंभः

आनन्दाचार्यप्रणीता

105
2(A)

[illegible]